श्रीः

भट्टोजीदीक्षितप्रणीता

॥ वैयाकरणसिद्धान्तकौमुदी ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

व्याकरणम् – व्याक्रियन्ते = निष्पाद्यन्ते शब्दा अनेनेति व्याकरणम् ।

संस्कृतव्याकरणस्य प्रमाणभूताः आचार्याः त्रयः – पाणिनिः, कात्यायनः/वररुचिः, पतञ्जलिश्च

अष्टाध्यायी सिद्धान्तकौमुदी च -

व्याकरणसम्बद्धाः सर्वे नियमाः पाणिनिना सूत्ररूपेण 'अष्टाध्यायी' इत्याख्ये ग्रन्थे निबद्धाः । एतानि सूत्राणि अष्टसु अध्यायेषु विभक्तानि (अत एव ग्रन्थस्य 'अष्ट-अध्यायी' इत्यन्वर्थं नाम) । प्रतिपादं चत्वारः पादाः । आहत्य ३२ पादेषु सूत्राणि योजितानि । सूत्राणां संख्या ~४००० । (कौमुद्याकारमतेन ३९७८ सूत्राणि) ।

अष्टाध्याय्यां क्वापि सूत्राणामर्थविषये चर्चा नास्ति, उदाहरणान्यपि न दीयन्ते । केवलं सूत्राणि अविच्छिन्नतया उक्तानि । तस्मात् सूत्राणामर्थम्, उदाहरणं च स्पष्टीकर्तुं वृत्तिग्रन्थाः प्रणीताः, येषु सूत्रम्-वृत्तिः(सूत्रार्थः)-उदाहरणम् इत्येतस्मिन् क्रमे सूत्राध्ययनं कर्तुं शक्यते । बहुषु वृत्तिग्रन्थेषु अष्टाध्यायीक्रमेणैव सूत्राणि व्याख्यातानि, यतो हि, सूत्राणां क्रमस्य महत् प्रामुख्यमस्ति । सूत्रक्रमानुरोधेनैव बहुत्र प्रक्रियानिर्वाहः क्रियते । किञ्च, सूत्राणि प्रकरणानुसारं निबद्धानि – यथा, सर्वाणि कारकसम्बन्धि सूत्राणि प्रथमाध्यायस्य चतुर्थपादे, समासविधायकानि सूत्राणि द्वितीयाध्यायस्य प्रथमद्वितीयपादयोः, सन्धिसूत्राणि षष्ठाध्यायस्य प्रथमपादे, इत्यादि । तस्मात्, अष्टाध्यायीक्रमेण अध्ययने कृते प्रकरणानां सम्पूर्णं ज्ञानं प्राप्तुं शक्यते ।

किन्तु प्रक्रियाणाम् अध्ययने अस्मिन् क्रमे कश्चन क्लेशः अनुभूयते । उदाहरणार्थम्, 'रामः' इति रूपस्य प्रक्रिया एवं भवति

राम ('अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिकसंज्ञा – १.२.४५)

राम सु ('स्वौजस्....' इत्यादिना सुप्रत्ययः – ४.१.२)

राम स् ('उपदेशेऽजनुनासिक इत्' इति उकारस्य इत्संज्ञा, लोपश्च – १.३.२, १.३.९)

राम र् ('ससजुषो रुः' इति सकारस्य रुत्वम् – ८.२.६६)

रामः ('खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गः – ८.३.१५)

एवं 'रामः' इति एकं रूपं साधयितुम् अष्टमाध्यायपर्यन्तमध्येतव्यं भवति । एतदेव मनसि निधाय प्रक्रियानुकूलाः बहवो ग्रन्थाः विरचिताः, येषामध्ययनेन प्रक्रियाणां ज्ञानं सुलभतया स्यात् । तादृशेषु ग्रन्थेषु 'वैयाकरणसिद्धान्तकौमुदी' मूर्धन्या ।

सिद्धान्तकौमुद्याः रचनाक्रमः – सूत्रक्रमे भेदः । सूत्रार्थः, उदाहरणानि । दलकृत्यम् । प्रकरणानि –

१. संज्ञाप्रकरणम्

२. परिभाषाप्रकरणम्

३. अच्सन्धिप्रकरणम्

४. अच्सन्धौ प्रकृतिभावः

५. हल्सन्धिप्रकरणम्

६. विसर्गसन्धिप्रकरणम्

७. स्वादिसन्धिप्रकरणम्

८. अजन्तपुँल्लिङ्गप्रकरणम्

९. अजन्तस्त्रीलिङ्गप्रकरणम्

१०.अजन्तनपुंसकलिङ्गप्रकरणम्

११.हलन्तपुँल्लिङ्गप्रकरणम्

१२.हलन्तस्त्रीलिङ्गप्रकरणम्

१३.हलन्तनपुंसकलिङ्गप्रकरणम्

१४. अव्ययप्रकरणम्

१५.स्त्रीप्रत्ययप्रकरणम्

१६. कारकप्रकरणम्

समासप्रकरणम्

तद्धितप्रकरणम्

दशगणी

सनाद्यन्ताः

पूर्वकृदन्ताः

उणादिप्रकरणम्

उत्तरकृदन्ताः

वैदिकप्रक्रिया

स्वरप्रक्रिया

किं नाम सूत्रम् ?

अल्पाक्षरम् असन्दिग्धं सारवद् विश्वतोमुखम् ।

अस्तोभम् अनवद्यं च सूत्रं सूत्रविदो विदुः ॥

सूत्राणि षोढा –

संज्ञा च परिभाषा च विधिः नियम एव च ।

अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ॥

संज्ञा – वृद्धिरादैच् , अदेङ् गुणः

परिभाषा – षष्ठी स्थानेयोगा, आद्यन्तौ टकितौ

विधिः – इको यणचि

नियमः – पतिः समास एव

अतिदेशः – तृज्वत् क्रोष्टुः

अधिकारः – प्रत्ययः, अङ्गस्य

अ इ उ ण्

ऋ ऌ क्

ए ओ ङ्

ऐ औ च्

ह य व र ट्

ल ण्

ञ म ङ ण न म्

झ भ ञ्

घ ढ ध ष्

ज ब ग ड द श्

ख फ छ ठ थ च ट त व्

क प य्

श ष स र्

ह ल्

इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि । एषामन्त्या इतः । लण्सूत्रे अकारश्च ।

हकारादिषु अकारः उच्चारणार्थः ।

॥ वैयाकरणसिद्धान्तकौमुदी ॥

पुनरावर्तनम् – व्याकरणम्, मुनित्रयम्, अष्टाध्यायी, सिद्धान्तकौमुदी, सूत्रलक्षणम्

सूत्रप्रभेदाः –

संज्ञा च परिभाषा च विधिः नियम एव च ।

अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ॥

संज्ञा – वृद्धिरादैच् , अदेङ् गुणः

परिभाषा – षष्ठी स्थानेयोगा, आद्यन्तौ टकितौ

विधिः – इको यणचि

नियमः – पतिः समास एव

अतिदेशः – तृज्वत् क्रोष्टुः

अधिकारः – प्रत्ययः, अङ्गस्य

अ इ उ ण्

ऋ ऌ क्

ए ओ ङ्

ऐ औ च्

ह य व र ट्

ल ण्

ञ म ङ ण न म्

झ भ ञ्

घ ढ ध ष्

ज ब ग ड द श्

ख फ छ ठ थ च ट त व्

क प य्

श ष स र्


ह ल्

इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि । एषामन्त्या इतः । लण्सूत्रे अकारश्च ।

हकारादिषु अकारः उच्चारणार्थः ।

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।

उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम् ॥



अन्योन्याश्रयः

॥ वैयाकरणसिद्धान्तकौमुदी ॥

पुनरावर्तनम् – सूत्रप्रभेदाः, माहेश्वरसूत्राणि, इत्संज्ञा – हलन्त्यम्, प्रत्याहाराः – आदिरन्त्येन सहेता, अन्योन्याश्रयः

सूत्रावृत्तिः

१. हलन्त्यम् (१.३.३) – एकपदात्मकं सूत्रम् । हलि अन्त्यं हलन्त्यम् ।

'हल्' इति सूत्रेऽन्त्यमित्स्यात् ।

२. आदिरन्त्येन सहेता (१.१.७१) – चत्वारि पदानि । आदिः, अन्त्येन, सह, इता ।

अन्त्येन इता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यात् ।

इति हल्-संज्ञायाम् ।

आदिः – यस्मात् पूर्वं नास्ति, परमस्ति ।

अन्त्यम् – यस्मात्परं नास्ति, पूर्वमस्ति ।

'स्वं रूपं शब्दस्याशब्द संज्ञा' (१.१.६८) इति सूत्रात् 'स्वम्' इति अनुवर्तते ।

१. हलन्त्यम् (१.३.३) – पदद्वयम् । हल्, अन्त्यम् ।

उपदेशेऽन्त्यं हल् इत् स्यात् ।

सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।

'हलन्त्यम्' (१.३.३) इति सूत्रे 'उपदेशेजनुनासिक इत्' (१.३.२) इति सूत्रात् 'उपदेशे' इति, 'इत्' इति च अनुवर्तते ।

उपदेशः आद्योच्चारणम् ।

धातु-प्रातिपदिक-निपात-प्रत्याहार-सूत्र-प्रत्यय-आदेश-आगमानामन्त्यम् इति भाष्यम्

ततः अण्, अच् इत्यादिसंज्ञासिद्धौ ।

३. उपदेशेऽजनुनासिक इत् (१.३.२) – चत्वारि पदानि । उपदेशे, अच्, अनुनासिकः, इत् । उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात् ।

प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

लण्सूत्रस्थ-अवर्णेन सह उच्चार्यमाणः रेफः रलयोः संज्ञा ।

रप्रत्याहारः – उरण् रपरः ।

पुनरावर्तनम् – हलन्त्यम्, आदिरन्त्येन सहेता, उपदेशेऽजनुनासिक इत्, प्रत्याहारनिर्माणम्

३. उपदेशेऽजनुनासिक इत् (१.३.२) – चत्वारि पदानि । उपदेशे, अच्, अनुनासिकः, इत् । उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात् ।

प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

लण्सूत्रस्थ-अवर्णेन सह उच्चार्यमाणः रेफः रलयोः संज्ञा ।

रप्रत्याहारः – उरण् रपरः ।

प्रत्याहारेषु इतां न ग्रहणम् । 'अनुनासिकः' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते ।

अनुनास् इ + क – ककारस्य 'अच्' प्रत्याहारे अन्तर्भावे,

अनुनास् य् + क - 'इको यणचि' इति यणादेशः

अनुनास् +क – 'लोपो व्योर्वलि' इति यकारस्य लोपः

अनुनास्कः

'आदिरन्त्येन सहेता' इत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते ।

प्रत्याह्रियन्ते = सङ्क्षिप्यन्ते वर्णाः इति प्रत्याहारः ।

४. ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१.१.३६) – त्रीणि पदानि । ऊकालः, अच्, ह्रस्व-दीर्घ-प्लुतः ।

उश्च ऊश्च उ(३)श्च वः । वां काल इव कालः यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ।

उ+ऊ = ऊ (अकः सवर्णे दीर्घः)

ऊ+उ(३) = ऊ (अकः सवर्णे दीर्घः)

अतः, उ+ऊ+उ(३) = ऊ ।

ऊ इति प्रातिपदिकम् । तस्य प्रथमाविभक्तौ बहुवचने 'वः' इति रूपम् । अत एव उश्च ऊश्च उ(३)श्च वः ।

'ऊ' इत्यस्य षष्ठीबहुवचने 'वाम्' इति रूपम् । अतः वाम् = त्रयाणाम् उकाराणां कालः=उच्चारणकालः इव कालः = उच्चारणकालः यस्य सः अच् क्रमात् ह्रस्व-दीर्घ-प्लुतसंज्ञः स्यात् इत्युच्यते ।

उकारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः ह्रस्वः ।

ऊकारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः दीर्घः ।

उ(३)कारोच्चारणकालसदृशः कालः यस्य वर्णस्य उच्चारणार्थम् अपेक्षितः सः स्वरः प्लुतः ।

सः प्रत्येकम् उदात्तादिभेदेन त्रिधा –

५. उच्चैरुदात्तः – पदद्वयम् । उच्चैः, उदात्तः ।

तालवादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसंज्ञः स्यात् ।

आ ये ।

६. नीचैरनुदात्तः - पदद्वयम् । नीचैः, अनुदात्तः ।

स्पष्टम् । ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः स्यात् ।

अर्वाङ्

लेखनावसरे अनुदात्तस्वरः अधोरेखाङ्कितो भवति ।

७. समाहारः स्वरितः – पदद्वयम् । समाहारः, स्वरितः ।

उदात्तत्व-अनुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सः अच् स्वरितसंज्ञः स्यात् ।

लेखनावसरे स्वरितस्वरः उपरि रेखाङ्कितो भवति ।

८. तस्यादित उदात्तमर्धह्रस्वम् – चत्वारि पदानि । तस्य, आदितः, उदात्तम्, अर्धह्रस्वम् ।

ह्रस्वग्रहणमतन्त्रम् । स्वरितस्य आदौ अर्धम् उदात्तं बोध्यम् । उत्तरार्धं तु परिशेषादनुदात्तम् ।

तस्य च उदात्तस्वरितपरत्वे श्रवणं स्पष्टम् । अन्यत्र तु उदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा ।

पुनरावर्तनम् – ह्रस्व-दीर्घ-प्लुताः, उदात्त-अनुदात्त-स्वरिताः

स नवविधोऽपि अनुनासिक-अननुनासिकत्वाभ्यां द्विधा ।

९. मुखनासिकावचनोऽनुनासिकः (१.१.८) – पदद्वयम् । मुख-नासिका-वचनः, अनुनासिकः

मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः स्यात् ।

तदित्थम् – अ, इ, उ, ऋ – एषां वर्णानां प्रत्येकम् अष्टादश भेदाः ।

ऌवर्णस्य द्वादश । तस्य दीर्घाभावात् ।

एचामपि द्वादश । तेषां ह्रस्वाभावात् ।

अ – १८

इ – १८

उ – १८

ऋ – १८

ऌ – १२

ए – १२

ओ – १२

ऐ – १२

औ – १२

आहत्य – १३२ स्वराः ।

१०. तुल्यास्यप्रयत्नं सवर्णम् (१.१.९) – पदद्वयम् । तुल्य-आस्य-प्रयत्नं, सवर्णम् ।

ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

स्थानानि –

अकुहविसर्जनीयानां कण्ठः – अ, क्, ख्, ग्, घ्, ङ्, ह्, ः

इचुयशानां तालु – इ, च्, छ्, ज्, झ्, ञ्, य, श्

ऋटुरषाणां मूर्धा

लृतुलसानां दन्ताः

उपूपध्मानीयानामोष्ठौ

ञमङणनानां नासिका च – ञ = तालु+नासिका, म = ओष्ठौ+नासिका

एदैतोः कण्ठतालु

ओदौतोः कण्ठोष्ठम्

वकारस्य दन्तोष्ठम्

जिह्वामूलीयस्य जिह्वामूलम् -

नासिकानुस्वारस्य

इति स्थानानि ।

यत्नः द्विधा – आभ्यन्तरो बाह्यश्च ।

आद्यः चतुर्धा ।

१. स्पृष्टः – क् - म्

२. ईषत्स्पृष्टः – य्, र्, ल्, व्

३. विवृतः – श्, ष्, स्, ह्, स्वराः

४. संवृतः – ह्रस्वस्य अवर्णस्य प्रयोगे ।

११. अ अ (८.४.६८)

विवृतम् अनूद्य संवृतः अनेन विधीयते । अस्य च अष्टाध्यायीं सम्पूर्णां प्रति असिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वम् अस्त्येव ।

१२. पूर्वत्रासिद्धम् (८.२.१) – पदद्वयम् । पूर्वत्र, असिद्धम् ।


अधिकारोऽयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा । त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धं स्यात् ।

अष्टाध्यायी (१.१.१ – ८.४.६८)

सपादसप्ताध्यायी (१.१.१ – ८.१.७४) त्रिपादी (८.२.१-८.४.६८)

पुनरावर्तनम् – स्वराणां विभागः, सवर्णसंज्ञा, वर्णोत्पत्तिस्थानानि, आभ्यन्तरप्रयत्नाः, पूर्वत्रासिद्धम् ।

बाह्यप्रयत्नस्तु एकादशधा ।



आन्तरतम्यपरीक्षा

तद्+हितम् ['झयो होऽन्यतरस्याम्' इति सूत्रेण हकारस्त्र पूर्वसवर्णः विधीयते]

पूर्वसवर्णः = पूर्वस्य, अर्थात् दकारस्य सवर्णः

सवर्णः = तुल्यास्यप्रयत्नं सवर्णम् । समानस्थानकाः समानाभ्यन्तरप्रयत्नकाश्च वर्णाः सवर्णाः।

दकारेण समानं स्थानं भवति – ऌ, त, थ, द, ध, न, ऌ, स् इति अष्टवर्णानाम् (ऌतुलसानां दन्ताः)

एतेषां मध्ये – ऌकारस्य सकारस्य च विवृतः प्रयत्नः (विवृतमूष्मणां स्वराणां च)

लकारस्य ईषत्स्पृष्टः प्रयत्नः (ईषत्स्पृष्टमन्तःस्थानाम्)

तवर्गस्य स्पृष्टः प्रयत्नः (स्पृष्टं प्रयतनं स्पर्शानाम् – कादयो मावसानाः स्पर्शाः)

तस्मात् दकारस्य सवर्णाः – त, थ, द, ध, न

एषु हकारस्य अन्तरतमः (अत्यन्तं सदृशः) एव तस्य स्थाने आदेशो भवितुमर्हति ।

कः हकारस्य अन्तरतमः?

हकारस्य बाह्यप्रयत्नाः –

१. संवारः, नादः, घोषः – तकार-थकारयोः विवार-श्वास-अघोषाः प्रयत्नाः । अतः ते आदेशा न भवन्ति । द्, ध्, न् इति त्रयः शिष्टाः ।

२. महाप्राणः – त्रिषु वर्णेषु धकार एव महाप्राणः ।

एवम् हकारस्य अन्तरतमः धकारः । स एव आदेशो भवति ।

तद् धितम् = तद्धितम् इति रूपम् ।

ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम् ।

होतृ + ऌकारः = होतॄकारः ।

ऋकारऌकारयोः सावर्ण्याभावे अत्र 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घः न स्यात् ।

अकारः – स्थानं कण्ठः (अ-कु-ह-विसर्जनीयानां कण्ठः),
प्रयत्नः विवृतः (विवृतम् ऊष्मणां स्वराणां च)
हकारः – स्थानं कण्ठः (अ-कु-ह-विसर्जनीयानां कण्ठः),
प्रयत्नः विवृतः (विवृतम् ऊष्मणां स्वराणां च)
तुल्यास्यप्रयत्नत्वात् अकार-हकारयोः सावर्ण्यं प्राप्नोति ।

एवमेव इकार-शकारयोः (तालु स्थानम्, विवृतः प्रयत्नः), ऋकार-षकारयोः(मूर्धा स्थानम्, विवृतः प्रयत्नः), , लृकार-सकारयोः (दन्ताः स्थानम्, विवृतः प्रयत्नः), परस्परं सावर्ण्यं प्राप्नोति ।

सवर्णसंज्ञायां सत्याम्,

दधि इव इत्यत्र यथा, तथा दधि शीतलम् इत्यत्रापि सवर्णदीर्घः स्यात् ।

दधि अत्र, दधि ऋतम्, दधि लृकारः इत्यादिषु यथा, तथा

दधि हरति, दधि षष्ठम्, दधि सान्द्रम् इत्यत्रापि यण् स्यात् ।

१३. नाज्झलौ (१.१.१०) – पदद्वयम् । न, आ+अच्+हलौ ।

आकारसहितः अच् आच्, स च हल् च इत्येतौ मिथः सवर्णौ न स्तः ।

तेन दधि इत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न ।

स्वराणां व्यञ्जनानां परस्परं सावर्ण्यं न भवतीति सामान्यतः अर्थः ।

पुनरावर्तनम् – बाह्यप्रयत्नाः, ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्, नाज्झलौ ।

१३. नाज्झलौ (१.१.१०) – पदद्वयम् । न, आ+अच्+हलौ ।

आकारसहितः अच् आच्, स च हल् च इत्येतौ मिथः सवर्णौ न स्तः ।

तेन दधि इत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न ।

स्वराणां व्यञ्जनानां परस्परं सावर्ण्यं न भवतीति सामान्यतः अर्थः ।

अत्र प्रश्नः – इकार-शकारयोः सावर्ण्ये सत्यपि सवर्णदीर्घः कथं भवति? अकः सवर्णे अचि परे सवर्णदीर्घः इति खलु सूत्रार्थः? यद्यपि हकारः अकारस्य सवर्णः, तथापि न अच्? एवमेव अकार-हकारयोः सावर्ण्ये सत्यपि दधि हरति इत्यत्र यण् कथम्? इकः स्थाने यण् स्यात् अचि संहितायां विषये । कथं हकारस्य अच्त्वम्?

१४. अणुदित्सवर्णस्य चाप्रत्ययः (१.१.६९) – चत्वारि पदानि । अणुदित्, सवर्णस्य, च, अप्रत्ययः ।

प्रतीयते विधीयते इति प्रत्ययः । अविधीयमानः अण् उदित्च सवर्णस्य संज्ञा स्यात् ।

अण् = अ, इ, उ, ऋ, ऌ, ए, ओ , ऐ, औ, ह्, य्, व्, र्, ल्

उदित् = उत् (=उकारः) इत् यस्य सः । कुँ, चुँ, टुँ, तुँ, पुँ ।

अकः सवर्णे दीर्घः – दैत्य अरिः, विद्या+आलयः ।

इको यणचि – मधु अरिः, वधू आदेशः ।

अस्य च्वौ – शुक्लीभवति, मालीभवति ।

एरच् – चि चयः, भी भयम् ।

अविधीयमानः किम्?

'इदम इश्' – इदम् शब्दस्य 'इ' इत्यादेशः । ह्रस्वः एव आदेशः, न त्रिमात्रकः ।

चोः कुः –

वाच् भ्याम्		ऊर्ज् भ्याम्
वाक् भ्याम्	(चोः कुः)	ऊर्ग् भ्याम्
वाग्भ्याम्		ऊर्ग्भ्याम्

अत्र अण् परेण णकारेण । अत्रैव इत्यर्थः ।

तदेवम् – अ इति अष्टादशानां संज्ञा । तथा इकार-उकारौ ।

ऋकारः त्रिंशतः । एवम् ऌकारोऽपि ।

उरण् रपरः – ऋकारस्य स्थाने यः अण् सः रपरो भवति । देव+ऋषिः = देवर्षिः । ऋकारस्य गुणः अर् ।

लृकारस्य स्थाने यः अण् सः लपरो भवति । तव+लृकारः = तवल्कारः । लृकारस्य गुणः अल् ।

एचः द्वादशानाम् । एदैतोः ओदौतोश्च न मिथः सावर्ण्यम् । ऐऔच् इति सूत्रारम्भसामर्थ्यात्। तेन एचः चतुर्विंशतेः संज्ञाः स्युः इति न आपादनीयम् ।

नाज्झलौ इति सावर्ण्यनिषेधः आक्षरसमाम्नायिकानामेव –

वर्णानामुपदेशास्तावत्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञोत्तरकालः 'आदिरन्त्येन सहेता' इति प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसंज्ञा, सवर्णसंज्ञोत्तरकालम् 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति (महाभाष्ये)

१. माहेश्वरसूत्रेषु वर्णानाम् उपदेशः
२. 'हलन्त्यम्' इति इत्-संज्ञा
३. 'आदिरन्त्येन सहेता' इति प्रत्याहारः ।
४. 'तुल्यास्यप्रयत्नम् सवर्णम्' 'नाज्झलौ' इति सवर्णसंज्ञानिर्णयः ।
५. 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सवर्णग्रहणम् ।

अतः 'इको यणचि' इत्यादिषु 'अचि' इत्युक्ते सर्वेषां स्वराणां (१३२) ग्रहणम् ।

'नाज्झलौ' इत्यत्र तु 'अच्' इत्युक्ते माहेश्वरसूत्रस्थानामेव (९) ग्रहणम् ।

अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ – इत्येतेषां व्यञ्जनैः सह सावर्ण्यं नास्ति ।

किन्तु आ, ई, ॠ – इत्येतेषां हकार-शकार-षकारैः सह सावर्ण्यम् न निवार्यते ।

लिह् भिः विश्वपा भिः

लिढ् भिः (हो ढः) विश्वप् ढ् भिः इति स्यात् ।

लिड्भिः

अतः 'नाज्झलौ' इत्यत्र आ+अच्=आच्, न आच्-हलौ इति च्छेदः । अच्-हलोः परस्परं सावर्ण्यं न भवति, आकारस्य हलः चापि परस्परं सावर्ण्यं न भवतीति अर्थः ।

'नाज्झलौ' इति सावर्ण्यनिषेधः यद्यपि आक्षरसमाम्नायिकानामेव, तथापि हकारस्य आकारः न सवर्णः। तत्र आकारस्यापि प्रश्लिष्टत्वात् । तेन विश्वपाभिः इत्यत्र हो ढः इति ढत्वं न भवति।

अनुनासिक-अननुनासिकभेदेन यवलाः द्विधा । तेन अननुनासिकास्ते द्वयोर्द्वयोः संज्ञाः ।

य् – यँ् व्-वँ् ल्-लँ्

संयमः – सँय्यमः संवत्सरः-सँव्वत्सरः विद्वान् लिखति – विद्वाँल्लिखति

पुनरावर्तनम् – सवर्णसंज्ञा, सवर्णनिषेधः, सवर्णग्रहणम्

अतो भिस ऐस् – अकारान्तात् परस्य भिस् प्रत्ययस्य ऐस् आदेशः स्यात् ।

राम भिस्	विश्वपा भिस्?
राम ऐस्	विश्वपाभिः
रामैस्	
रामैः	

ऋतो ङिसर्वनामस्थानयोः – ऋकारान्तस्य प्रातिपदिकस्य गुणः विधीयते । ह्रस्व-ऋकारान्तस्यैव भवति, न तु दीर्घस्य ।

१५. तपरस्तत्कालस्य (१.१.७०) – पदद्वयम् । तपरः, (तपरः), तत्कालस्य । तपरः इति आवर्तते । अण् इति अनुवर्तते (अणुदित् सवर्णस्य चाप्रत्ययः) ।

तः परः यस्मात् सः, तात्परश्च उच्चार्यमाणसमकालस्यैव संज्ञा स्यात् ।

X+त् – तः परः यस्मात् सः तपरः ।

त्+X – तात् परः तपरः ।

तत्कालः = तस्य (=उच्चार्यमाणस्य) कालः इव कालः यस्य सः ।

इदं नियमसूत्रम् । 'अणुदित् सवर्णस्य चाप्रत्ययः' इत्यनेन सर्वेषां सवर्णानां ग्रहणे प्राप्ते, तपरश्चेत् तत्कालानां सवर्णानामेव ग्रहणं भवति इति नियम्यते ।

तेन अत्, इत्, इत्यादयः षण्णां षण्णां संज्ञाः । ऋत् इति द्वादशानाम् ।

अत् = अ, अँ, अ, अँ, अं, अँ

१६. वृद्धिरादैच् (१.१.१) – पदद्वयम् । वृद्धिः, आ-द्-ऐच् ।

आदैच्च वृद्धिसंज्ञः स्यात् ।

आ त् ऐच् – तात् परः तपरः । तस्माद् दीर्घयोरेव ऐकार-औकारयोः वृद्धिसंज्ञा, न तु प्लुतयोः।

फलितार्थः – दीर्घ-आकारस्य, दीर्घ-ऐकारस्य, दीर्घ-औकारस्य च 'वृद्धिः' इति संज्ञा व्याकरणशास्त्रे ।

वृद्धिः – सूत्रकारकृतं मङ्गलम् ।

वृद्धिसंज्ञाश्रितानि कार्याणि – वृद्धिरेचि, मृजेर्वृद्धिः ।

१७. अदेङ् गुणः (१.१.२) – पदद्वयम् । अ-द्-एङ्, गुणः ।

अदेङ् च गुणसंज्ञः स्यात् ।

अ त् एङ्

तः परः यस्मात् सः तात्परः

ह्रस्वस्य अकारस्य, दीर्घयोः एकार-ओकारयोः शास्त्रे 'गुणः' इति संज्ञा ।

गुणसंज्ञाश्रितानि कार्याणि – आद्गुणः, मिदेर्गुणः ।

१८. भूवादयो धातवः (१.३.१) – पदद्वयम् । भू-वा-आदयः, धातवः ।

क्रियवाचिनः भ्वादयः धातुसंज्ञाः स्युः ।

वा – वाति इत्यत्र क्रियावाची (वा गतिगन्धनयोः) । करोषि, न वा? इत्यत्र विकल्पवाची ।

क्रियावाचिनः एव धातुसंज्ञा ।

हिरुक् वर्जने – भ्वादिगणपठितत्वं नास्ति । अतः क्रियावचनत्वेऽपि न धातुसंज्ञा ।

धातुसंज्ञाश्रितानि कार्याणि – आतो धातोः, धातोः कर्मणः समानकर्तृकादिच्छायां वा ।

१९. प्राग्रीश्वरान्निपाताः (१.४.५६) – पदत्रयम् । प्राक्, रीश्वरात्, निपाताः ।

इत्यधिकृत्य ।

'निपाताः' इति संज्ञा अधिक्रियते । 'अधिरीश्वरे' (१.४.९७) इत्येतत्पर्यन्तम् ।

२०. चादयोऽसत्त्वे (१.४.५७) – पदद्वयम् । च-आदयः, असत्त्वे ।

अद्रव्यार्थाः चादयः निपातसंज्ञाः स्युः ।

चादयः – च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, सूपत्, कूपत्, कुवित्, नेत्, चेत्, चण, कच्चित्, यत्र, तत्र, नह, हन्त, माकिम्, माकीम्, माकिर्, नकिम्, नकीम्, नकिर्, आकीम्, माङ्, नञ्, तावत्, यावत्, त्वा, त्वै, द्वै, न्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, ओम्, तथा, तथाहि, खलु, किल, अथ, सुष्ठु, स्म, अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ, औ, आदह, उञ्, उकञ्, वेलायाम्, मात्रायाम्, यथा, यत्, तत्, किम्, पुरा, बधा, धिक्, हाहा, हेहै, पाट्, प्याट्, आहो, उताहो, हो, अहो, ना, अथो, ननु, मन्ये, मिथ्या, असि, ब्रूहि, तु, नु, इति, इव, वत्, वात्, वन, बत, सनुकम्, छंवट्, शङ्के, शुकम्, खम्, सनात्, सनतर्, नहिकम्, सत्यम्,

ऋतम्, अद्धा, इद्धा, नोचेत्, नचेत्, नहि, जातु, कथम्, कुतः, कुत्र, अव, अनु, हा, हे, आहोस्वित्, शम्, कम्, खम्, दिष्ट्या, पशु, नट्, सह, आनुषट्, अङ्ग, फट्, ताजक्, भाजक्, अये, अरे, वाट्, कुम्, खुम्, घुम्, अम्, ईम्, सीम्, सिम्, सि, वै ।

अद्रव्यार्थाः – लिङ्गसंख्यान्वितं द्रव्यम् ।

शुकं गच्छति = शीघ्रं गच्छति । निपातसंज्ञा भवति ।

शुकं पश्य = पक्षिविशेषं पश्य । निपातसंज्ञा न भवति ।

पशुं नयन्ति = प्राणिविशेषं नयन्ति । निपातसंज्ञा न भवति ।

पुष्टं पशु मन्यते = सम्यगित्यर्थः । निपातसंज्ञा भवति ।

निपातसंज्ञाश्रितानि कार्याणि – स्वरादिनिपातमव्ययम्, निपात एकाजनाङ् ।

२१. प्रादयः (१.४.५८) – एकं पदम् । प्र-आदयः । असत्त्वे इत्यनुवर्तते (चादयोऽसत्त्वे)। निपाताः इति अधिक्रियते ।

अद्रव्यार्थाः प्रादयस्तथा । (निपातसंज्ञाः स्युः इत्यर्थः) ।

२२. उपसर्गाः क्रियायोगे (१.४.५९) – प्रादयः इति अनुवर्तते । निपाताः इति अधिक्रियते ।

२३. गतिश्च (१.४.६०) – प्रादयः इति अनुवर्तते । निपाताः इति अधिक्रियते ।

प्रादयः क्रियायोगे उपसर्गसंज्ञाः गतिसंज्ञाश्च स्युः ।

उपसर्गसंज्ञाश्रितानि कार्याणि – उपसर्गादसमासेऽपि णोपदेशस्य, उपसर्गस्यायतौ ।

गतिसंज्ञाश्रितानि कार्याणि – गतिकारकोपपदात् कृत्, गतिरनन्तरः ।

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप – एते प्रादयः ।

२४. न वेति विभाषा (१.१.४४) – चत्वारि पदानि । न, वा, इति, विभाषा ।

निषेध-विकल्पयोः विभाषा संज्ञा स्यात् ।

पाणिनीयशास्त्रे वा, विभाषा, अन्यतरस्याम्, बहुलम् – इत्येते शब्दाः विकल्पार्थकाः उपयुज्यन्ते ।

२५. स्वं रूपं शब्दस्याशब्दसंज्ञा (१.१.६८) – चत्वारि पदानि । स्वम्, रूपम्, शब्दस्य, अशब्दसंज्ञा ।

शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना ।

लोके सर्वदा अर्थस्यैव प्राधान्यम् । गाम् आनय इत्युक्ते गोरूपपदार्थः पशुविशेषः आनीयते, न तु 'गो' इति शब्दः । धेनुमानय इत्युक्तेऽपि स एव पदार्थः आनीयते ।

किन्तु व्याकरणशास्त्रे शब्दस्य प्राधान्यम् । 'अग्नेर्ढक्' इत्युक्ते 'अग्नि' इति शब्दस्य ढक् प्रत्ययः क्रियते, न तु अग्निपदार्थस्य । किञ्च, अग्निशब्दस्य विहितं कार्यम् 'अ ग् न् इ' इति आनुपूर्व्याः एव भवति, न तु वह्निशब्दस्य, न वा अनलशब्दस्य ।

शब्दसंज्ञा – व्याकरणशास्त्रे उपयुक्ताः वृद्धि-गुणादिसंज्ञाः ।

शब्दसंज्ञानां विषये अर्थस्यैव प्राधान्यं शास्त्रेऽपि, न तु शब्दस्य । 'मृजेर्वृद्धिः' इत्युक्ते वृद्धिपदार्थः आकारः आदेशो भवति, न तु 'वृद्धि'शब्दः ।

पुनरावर्तनम् – तपरकरणम्, वृद्धिः, गुणः, धातुः, निपाताः, शब्दस्य स्वरूपग्रहणम्

२६. येन विधिस्तदन्तस्य (१.१.७२) – त्रीणि पदानि । येन, विधिः, तदन्तस्य ।

विशेषणं तदन्तस्य संज्ञा स्यात्, स्वस्य च रूपस्य ।

'अङ्गस्य' इत्यधिकारे 'जराया जरसन्यतरस्याम्' इति सूत्रेण जराशब्दस्य 'जरस्' आदेशः विधीयते ।

अङ्गं विशेष्यम् । जरा इति विशेषणम् ।

विशेषणं तदन्तस्य संज्ञा स्यात् – 'निर्जर' शब्दस्यापि जरसादेशः भवति ।

स्वस्य च रूपस्य – केवल 'जरा' शब्दस्यापि जरसादेशः भवति ।

समासप्रत्ययविधौ प्रतिषेधः (वा) ।

समासविधौ, प्रत्ययविधौ च तदन्तग्रहणं नास्ति ।

समासे यथा –

द्वितीया श्रित-अतीत-पतित-गत-अत्यस्त-प्राप्त-आपन्नैः ।

श्रितादयः विशेषणानि, सुबन्तमिति विशेष्यम् ।

कृष्णं श्रितः = कृष्णश्रितः ।

कृष्णं परमश्रितः = ?? । समासविधौ तदन्तविधिप्रतिषेधात् श्रितान्तेन सुबन्तेन समासो न भवति ।

प्रत्ययविधौ यथा –

नडादिभ्यः फक् ।

नडादिभ्यः इति विशेषणम्, प्रातिपदिकात् इति विशेष्यम् ।

नडस्य गोत्रापत्यम् = नाडायनः ।

सूत्रनडस्य अपत्यम् = ?? । प्रत्ययविधौ तदन्तविधिप्रतिषेधात् नडान्तस्य प्रातिपदिकस्य फक् प्रत्ययः न भवति ।

उगिद्वर्णग्रहणवर्जम् (वा) ।

यत्र सूत्रे उगिद्-ग्रहणम्, अथ वा वर्णग्रहणमस्ति, तत्र समासप्रत्ययविधावपि तदन्तविधिः अस्ति । उगिद्वर्णग्रहणं वर्जयित्वा अन्यत्र समासप्रत्ययविधौ प्रतिषेधः ।

उगिद्-ग्रहणं यथा –

उगितश्च । ङीप्-प्रत्ययः विधीयते ।

उगितः इति विशेषणम्, प्रातिपदिकात् इति विशेष्यम् ।

उक् इत् यस्य सः उगित् । उक् प्रत्याहारः = उ, ऋ, ऌ । एते वर्णाः यत्र इत्-संज्ञां प्राप्नुवन्ति, सः उगित् ।

उदा – भवतु शब्दः (सर्वनाम - उकारः इत्)

भवत् + ङीप् = भवती ।

तदन्तविधिः अस्ति । तस्मात् अतिभवत् शब्दादपि ङीप् भवति । अतिभवती ।

वर्णग्रहणं यथा –

अत इञ् । इञ् प्रत्ययः विधीयते ।

अतः=ह्रस्व अकारात् इति विशेषणम् । प्रातिपदिकात् इति विशेष्यम् ।

तदन्तविधेः सत्त्वात् अकारान्तात् प्रातिपदिकात् इञ् प्रत्ययः भवति ।

दशरथस्य अपत्यं दाशरथिः ।

केवलात् अकारादपि भवति ।

अस्य अपत्यम् इः ।

२७. विरामोऽवसानम् (१.४.११०) – पदद्वयम् । विरामः, अवसानम् ।

वर्णानामभावः अवसानसंज्ञः स्यात् ।

राम स्

राम र् – अवसानम्

रामः (खरवसानयोः विसर्जनीयः – इति रेफस्य विसर्गः)

२८. परः सन्निकर्षः संहिता (१.४.१०९) – पदत्रयम् ।

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

२९. सुप्तिङन्तं पदम् (१.४.१४) – पदद्वयम् ।

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।

'हरिः' इति पदम्, न तु 'हरि' । 'भवति' इति पदम्, न 'भू' इति ।

अपदं न प्रयुञ्जीत ।

३०. हलोऽनन्तराः संयोगः (१.१.७) – पदत्रयम् । हलः, अनन्तराः, संयोगः ।

अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः ।

हलः – ह् अ ल् अः

व्यञ्जनानि – व् य् अ ञ् ज् अ न् आ न् इ

३१. ह्रस्वं लघु (१.४.१०) – पदद्वयम् ।

लघु, गुरु

३२. संयोगे गुरु (१.४.११) – पदद्वयम् । 'ह्रस्वम्' इत्यनुवर्तते ।

संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।

कृष्ण

३३. दीर्घं च (१.४.१२) – पदद्वयम् । 'गुरु' इत्यनुवर्तते ।

दीर्घं च गुरुसंज्ञं स्यात् ।

राम